अष्टमः पाठः

# जलमेव जीवनम्



अस्माकं जीवनस्य सुखाय प्रकृतिः नाना पदार्थान् धारयति। तेषु वनस्पतयः, पशुपक्षिणः, मेघः, सूर्यः, भूमिः, पर्वतः, पवनः, जलम् इत्येते सन्ति। सर्वेषु च जलस्य प्रधानता वर्तते। जलं विना मानवो न जीवति, वनस्पतयः शुष्यन्ति, मेघाः न भवन्ति, अन्नं न जायते। भूमिः अपि शुष्यति। अतो जलं सर्वस्य जीवनम् अस्ति।

भूमौ जलस्य नाना स्थानानि सन्ति। क्वचित् नदी, क्वचित् सरोवरः, विशालः सागरश्च अस्ति। सागरे तु जलं क्षारम् अस्ति। मेघः क्षारं जलं पीत्वा मधुरं जलं ददाति। नद्यां सरोवरे च जलं मधुरं भवति। जनाः कूपान् खनित्वा जलं निष्कासन्ति। क्वचित् कूपे मधुरं पेयं जलं भवति, क्वचित् क्षारम् अपेयं जलं भवति।

अधुना भूमिगतं जलमपि यन्त्रेण निष्कासन्ति। क्षेत्राणां सेचने सर्वस्य जलस्य प्रयोगः भवति। सेचनात् क्षेत्रेषु अन्नं भवति। वनस्पतयः वर्षाजलेन जीवन्ति। अतः सर्वेषां जीवानां वनस्पतीनां भूमेश्च जीवनं जलमेव अस्ति।

**शब्दार्थः**

| | | |
|---|---|---|
| अस्माकम् | | हमारा/री/रे |
| सुखाय | = | सुख के लिए |
| नाना | = | विविध, अनेक प्रकार के |
| पदार्थान् | = | वस्तुओं को |
| सर्वेषु | = | सब में |
| धारयति | = | धारण करता /करती है |
| शुष्यन्ति | = | सूख जाते/जाती हैं |
| जायते | = | होता/होती है |
| क्षारम् | = | खारा |
| मधुरम् | = | मीठा |
| खनित्वा | = | खोदकर |
| निष्कासन्ति | = | निकालते/निकालती हैं |
| क्वचित् | = | कहीं |
| कूपान् | = | कुओं को |
| पेयान् | = | पीने योग्य |
| अधुना | = | आजकल |
| यन्त्रेण | = | मशीन के द्वारा |
| क्षेत्राणाम् | = | खेतों की/का/के |
| सेचने | = | सिंचाई में |
| सेचनात् | = | सिंचाई से |
| क्षेत्रेषु | = | खेतों में |
| जीवानाम् | = | प्राणियों का/की/के |
| भवति | = | होता है |

## व्याकरणम्

सन्धि–विच्छेदः/पदविभागः

| | | |
|---|---|---|
| जलमेव | = | जलम् + एव |
| इत्येते | = | इति + एते |

सागरश्च = सागरः + च

भूमेश्च – भूमेः + च

जलमपि – जलम् + अपि

**वर्ण-विशेषाः**

क्ष त्र ज्ञ – देवनागरी लिपि में ये तीनों संयुक्ताक्षर हैं–

क् + ष = क्ष ।

त् + र = त्र ।

ज् + ञ = ज्ञ ।

## अभ्यासः

### मौखिकः

**1. इन शब्दों का अर्थ बताएँ:-**

अस्माकम्, धारयति, शुष्यन्ति, क्वचिद्, क्षारम्, कूपान्, यन्त्रेण, क्षेत्राणाम्, जीवम्, सर्वेषाम् ।

**2. निम्नलिखित शब्दों से वाक्य बनाएँ:-**

सूर्यः, पवनः, जलमेव, मधुरम्, अस्ति ।

### लिखितः

3. मञ्जूषा से सही शब्द चुनकर रिक्त स्थानों को भरें :-

| शुष्यति, जलमेव, जीवन्ति, प्रधानता, सरोवरे |
|---|

(क) ................. जीवनम्।

(ख) सर्वेषु च जलस्य ................ वर्तते।

(ग) भूमिः अपि .................... ।

(घ) नद्यां .................. च जलं मधुरं भवति।

(ङ) वनस्पतयः वर्षाजलेन .................।

**4. पाठ के आधार पर जल की महत्ता पर पाँच वाक्य लिखें ।**

5. पाठ के आधार पर निम्नलिखित वाक्यों का संस्कृत ढूँढ़कर लिखें -

(क) जल मीठा है। (अस्ति)

(ख) समुद्र का जल खारा होता है। (क्षारम्)

(ग) नदी का जल मीठा होता है। (मधुरं)

(घ) जल सब का जीवन है । (जीवनम्)

(ङ) खेतों में अन्न होता है । (क्षेत्रेषु)

6. सन्धि-विच्छेद/पदविभाग करें-

सागरश्च, जलमपि, कोऽपि, जलमेव, तथापि।

**7. सही विकल्प चुनेंः-**

| | | | |
|---|---|---|---|
| (क) | खाना | - | भोजनम्, फलम्, मिष्टान्नम् । |
| (ख) | जल | - | जलम्, जले, जलेन । |
| (ग) | खेत में | - | क्षेत्राणि, क्षेत्रेषु, क्षेत्रम् । |
| (घ) | सूर्य | - | सूर्यः, सूर्यम्, सूर्याय । |
| (ङ) | सूखता है | - | शुष्यन्ति, शुष्यति, शुष्यतः । |

**8. निम्नलिखित शब्दों का वर्ण-विच्छेद करें-**

जैसे- जले = ज् + अ / ज   ल् + ए / ले

(क) मेघः = ..............................।

(ख) पवनः = ..............................।

(ग) जनाः = ..............................।

(घ) जीवनम् = ..............................।

9. **निम्नलिखित वर्णों को मिलाएँ-**

जैसे- क् + र = क्र

र् + क = र्क

(क) र् + प =

(ख) प् + र =

(ग) ल् + प =

(घ) प् + ल =

(ङ) ज् + य =